# Shri Vindhyavasini Dashapadi

# શ્રી વિન્ધ્યવાસિનિ દશપદી

## Document Information

Text title : Vindhyavasini DashapadI

File name : vindhyavAsinidashapadI.itx

Category : devii, devI, dashaka

Location : doc_devii

Author : Batohi Jha

Proofread by : Kavitha Aanand

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 13, 2026

*sanskritdocuments.org*

# શ્રી વિન્ધ્યવાસિનિ દશપદી

શ્રીવિન્ધ્યવાસિન્યૈ નમઃ ।
સૌવર્ણામ્બુજમધ્યગાં ત્રિનયનાં સૌદામિનીસન્નિભાં
શખં ચક્રવરાભયાનિ દધતીમિન્દોઃ કલાં બિભ્રતીમ્ ।
ગ્રૈવેયાઙ્ગદહારકુણ્ડલધરામાખણ્ડલાદ્યૈઃ સ્તુતાં
ધ્યાયેદ્ વિન્ધ્યનિવાસિનીં શશિમુખીં પાર્શ્વસ્થપઞ્ચાનનામ્” ॥

સિંહસ્થા મૃગરાજગા ચ વિજયા દુર્ગા ચ પદ્માવતી
નાગાધીશ્વરવિષ્ટરા ચ લલિતા લક્ષ્મીઃ સરોજસ્થિતા ।
માતઙ્ગી ચ સુરત્નપીઠપદવી સ્તુત્યાશ્ચ સર્વાઃ પરં
સૌવર્ણામ્બુજમધ્યગા વિજયતે તાસાં હિ વિન્ધ્યેશ્વરી ॥ ૧॥

હસ્તાસ્યાઙ્ઘ્રિદશા પરં ત્રિનયના દેવી મહાકાલિકા
દુર્ગા સિદ્ધિકરી જયા શશિધરા ધ્યાતા ત્રિનેત્રા સતામ્ ।
આરાધ્યા ભુવનેશ્વરી શિવશિવા યુક્તા ત્રિભિર્લોચનૈઃ
સૌમ્યા બાહુચતુષ્ટયા ત્રિનયના વિન્ધ્યેશ્વરી શઙ્કરી ॥ ૨॥

નીલાશ્મદ્યુતિકાલિકાં ભગવતી કાલાભ્રતુલ્યા જયા
વિદ્યુદ્દામસમા દિવાકરનિભા દુર્ગા ચ પદ્માવતી ।
ધ્યાતવ્યા ચ સરસ્વતી મતિમતાં શીતાંશુતુલ્યપ્રભા
દૃશ્યા વિન્ધ્યનિવાસિની કલિયુગે સૌદામિનીસન્નિભા ॥ ૩॥

ખડ્ગાદિં દધતી કરૈઃ સુવિદિતા શ્યામાઽસતાં ભીષણા
માલાકુમ્ભકપાલનીરજકરા પદ્માવતી સંસ્તુતા ।
બાલાનાં ભુવનેશ્વરી નહિ તથા સૌમ્યા સપાશાઙ્કુશા
શખં ચક્રવરાભયાનિ દધતી વિન્ધ્યેશ્વરી વૈષ્ણવી ॥ ૪॥

દેવી બદ્ધહિમાંશુરત્નમુકુટા મૂર્ધેન્દુરેખા જયા
માતઙ્ગી શશિખણ્ડધા શશિધરા દુર્ગા ચ કામેશ્વરી ।
ધ્યાતવ્યા ભુવનેશ્વરીન્દુમુકુટા ચન્દ્રાર્ધપદ્માવતી

વિન્ધ્યે કાઽપિ નિરીક્ષ્યતે સહૃદયૈરિન્દોઃ કલાં બિભ્રતી ॥ ૫॥

કાલી સર્વવિભૂષણાવૃતવપુઃ કહ્લારમાલાશ્રિયા
માતઙ્ગી કરુણાતરઙ્ગિતદૃશા સ્તુત્યા ભવાની સતી ।
ભાસ્વદ્દેહલતા સુરત્નનિવહૈઃ પદ્માવતી, વિન્ધ્યગા
ગ્રૈવેયાઙ્ગદહારકુણ્ડલધરા ભૂષામૃદુર્માધવી ॥ ૬॥

આદૌ સંસ્તુતવાંસ્તથા કમલજો બોધાય કાલીં હરેઃ
સિદ્ધ્યર્થં સુજનૈર્જયા સુરવૃતા કન્યાભિરાસેવિતા ।
ધ્યાતવ્યા હ્યણિમાદિભિશ્ચ કિરણૈઃ કામ્યૈર્ભવાની વૃતા
વિન્ધ્યસ્થા શરણં સ્વતો ભુવિ પરઞ્ચાખણ્ડલાદ્યૈઃ સ્તુતા ॥ ૭॥

ભક્તાનાં વિતનોતિ સૌખ્યનિકરં લક્ષ્મીઃ પ્રસન્નાનના
માતુઃ પાલનશિક્ષણં વિતનુતે વક્ત્રારવિન્દશ્રિયા ।
સંસારે ભુવનેશ્વરી સ્મિતમુખી સ્તોતુશ્ચ દાને સદા
વિન્ધ્યાદ્રૌ પૃથુલોચના શશિમુખી તાપૌષધિર્દર્શનાત્ ॥ ૮॥

સિંહસ્કન્ધગતા જયા મૃગપતિસ્કન્ધે ચ દુર્ગા સ્થિતા
સર્વજ્ઞેશ્વરભૈરવાઙ્કનિલયા પદ્માવતી સુપ્રિયા ।
સિંહઃ પાર્શ્વગતઃ શિવોઽથ દયિતઃ પઞ્ચાનનો દ્વાવપિ
પ્રીતિં વિન્ધ્યગતોભયીં વિતનુતે પાર્શ્વસ્થપઞ્ચાનના ॥ ૯॥

આખ્યાને પ્રથમે સ્તુતા સુવિધિના કાલી દ્વિતીયે તતો
લક્ષ્મીશ્ચાપિ સરસ્વતી ચ મહતી સર્વા તૃતીયેઽન્તતઃ ।
માતઙ્ગી ભુવનેશ્વરી ચ વિજયા દુર્ગા ભવાની શિવા
તાસાં વિન્ધ્યનિવાસિની સકરૂણા ગઙ્ગાસખીલોચના ॥ ૧૦।
વિન્ધ્યાચલનિવાસિન્યાઃ સ્થાનં સર્વોત્તમોત્તમમ્ ।
સાસમ્મુખગતાનાં હિ પ્રીણાતિ વિન્ધ્યવાસિની ॥ ૧૧॥

શ્રીવિન્ધ્યવાસિની માતા ગીતા દશપદીસ્તુતિઃ ।
વિતનોતુ સતાં મોદં સર્વમઙ્ગલસંયુતમ્ ॥ ૧૨॥

ઇતિ શ્રી વિન્ધ્યવાસિનિ દશપદી સમ્પૂર્ણા ।
॥ ઇતિ શમ્ ॥

Proofread by Kavitha Aanand

*Shri Vindhyavasini Dashapadi*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*